अस्य ध्यानादि यथा,—
"नीलवर्णां त्रिनयनां षड्भुजां वरदां पराम् ।
पीतवस्त्रपरीधानां सदा सिद्धिप्रदायिनीम् ॥
एवं ध्यात्वा थकारन्तु तन्मन्त्रं दशधा जपेत् ।
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा ॥
तरुणादित्यसङ्काशं थकारं प्रणमाम्यहम् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥
अस्य नामानि यथा,—
"थः स्थिरामी महाग्रन्थिर्ग्रन्थिग्राही भयानकः ।
शिली शिरश्छिन्नो दण्डी भद्रकाली शिलोच्चयः ॥
कृष्णो बुद्धिर्व्विकर्म्मा च दक्षनाशाधिपोऽमरः ।
वरदा भोगदा केशो वामजानुरसोऽनलः ॥
लोलौजस्वयिनी गुह्यः शरचन्द्रविदारकः ॥"
इति नानातन्त्रशास्त्रम् ॥

थं, क्ली, रक्षणम् । मङ्गलम् । साध्वसम् । इति मेदिनी । थे, १ ॥

थः, पुं, ( थुड़ संवृतौ+डः । ) पर्व्वतः । भयरक्षकः । इति मेदिनी । थे, २ ॥ व्याधिभेदः । भयचिह्नम् । भक्षणम् । इति शब्दरत्नावली ॥

थुड, शि संवृतौ । इति कविकल्पद्रुमः ॥ ( तुदां-परं-सकं-सेट् । ) शि, थुड़ति । अथुड़ीत् तुथोड़ । इति दुर्गादासः ॥

थुत्कारः, पुं, ( कृ+भावे घञ् । थुदित्यव्यक्तशब्दस्य कारः करणं यत्र । ) निष्ठीवनत्यागानुकरणशब्दः ॥

थुर्व्व, ई वधे । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-सकं-सेट् । ) पञ्चमस्वरी । थूः थुरौ थुरः । ई, थूर्णः । इति दुर्गादासः ॥

थुर्व्वणं, क्ली, हननम् । थुर्व्वधातोर्भावे अनटि ( ल्युटि ) निष्पन्नम् ॥

थूथू, अ, निष्ठीवनत्यागानुकरणशब्दः । यथा,— थूथूकृत्य वमद्भिरध्वगजनैरिति सदुक्तिकर्णामृतम् ॥

थैथै, अ, वाद्यानुकरणशब्दविशेषः । इति सङ्गीतदामोदरः ॥

थोड़नं, क्ली, संवरणम् । इति थुडधातोर्भावेऽनट् प्रत्ययः ( ल्युट् ) ॥

---

## द

द, दकारः । स व्यञ्जनाष्टादशवर्णः तवर्गतृतीयवर्णश्च । अस्योच्चारणस्थानं दन्तः । इति व्याकरणम् ॥ ( यथा, शिक्षायाम् । १७ ।
"स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः ॥")

अस्य स्वरूपं यथा,—
"दकारं शृणु चार्व्वङ्गि ! चतुर्व्वर्गप्रदायकम् ।
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा ॥
त्रिशक्तिसहितं देवि ! त्रिबिन्दुसहितं सदा ।
आत्मादितत्त्वसंयुक्तं स्वयं परमकुण्डली ॥
रक्तविद्युल्लताकारं दकारं हृदि भावय ॥"
इति कामधेनुतन्त्रम् ॥

अस्य ध्यानादि यथा,—
"ध्यानमस्य दकारस्य वक्ष्यते शृणु पार्व्वति ! ।
चतुर्भुजां पीतवस्त्रां नवयौवनसंस्थिताम् ॥
अनेकरत्नघटितहारनूपुरशोभिताम् ।
एवं ध्यात्वा दकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
अस्य नामानि यथा, नानातन्त्रशास्त्रे ।
"दोऽत्रीशो धातकिर्धाता दाता दलं कलत्रकम् ।
दीनं ज्ञानञ्च दानञ्च भक्तिराह्वनी धरा ॥
सुषुम्ना योगिनी सद्यः कुण्डली वामगुल्फकः ।
कात्यायनी शिवा दुर्गा लङ्गना ना त्रिकण्ठकी ॥
स्वस्तिकः कुटिलारूपः क्षमाश्चोमा जितेन्द्रियः ।
धर्म्मह्रासमदेवश्च भ्रमा बहुसचञ्चला ॥
हरिद्रापुरमन्त्रौ च दक्षपार्श्विस्थिरेखकः ॥"

दं, क्ली, ( ददाति आनन्दमिति । दा+बाहुलकात् कः । ) भार्य्या । इत्येकाक्षरकोषः ॥

दः, पुं, ( दै प शुद्धौ वा दा दाने+बाहुलकात् कः । ) अचलः । दत्तः । दाता । इति मेदिनी दे, १ ॥ ( दो च्छेदे+डः । ) खण्डनम् । इति शब्दरत्नावली ॥ ( यथा, माघे । १९ । ११४ ।
"दाददोद्दुद्दुद्दादी दादादोदूददीददोः ।
दुद्दादं दददे दुद्दे ददाददददोऽददः ॥"
"दद्यते इति दादो दानम् । दददाने कर्म्मणि घञ् । दादं ददातीति दाददो दानप्रदः ।" इत्यादौ मल्लिनाथकृतटीकायामर्थविशेषा बोद्धव्याः ॥ )

दंशः, पुं, ( दशतीति । दंश दंशने+पचाद्यच् । ) कीटविशेषः । डाँश इति भाषा । तत्पर्य्यायः । वनमक्षिका २ । इत्यमरः । २ । ५ । २७ ॥ गोमक्षिका ३ अरण्यमक्षिका ४ भम्भरालिका ५ । इति शब्दरत्नावली ॥ पांशुरः ६ दंशकः ७ । इति हारावली ॥ दुष्टसुखः ८ क्रूरः ९ क्षुद्रिका १० । इति राजनिर्घण्टः ॥ ( यथा, मनुः । १ । ४५ ।
"स्वेदजं दंशमशकं यूकामक्षिकमत्कुणम् ।
ऊष्मणश्चोपजायन्ते यच्चान्यत् किञ्चिदीदृशम् ॥"
दशतीव शरीरमिति । ) वर्म्म । ( यथा, भागवते । ३ । १८ । ६ ।
"पराङ्गचक्रं तपनीयोपकल्पं
महागदं काञ्चनचित्रदंशम् ॥"
दश+भावे घञ् । ) दंशनम् । इति मेदिनी । शे, ७ ॥
("सुप्तता जायते दंशे कृष्णचातिस्रवत्यसृक् ॥"
इति सुश्रुते कल्पस्थाने षष्ठेऽध्याये ॥ )
दन्तः । इति हेमचन्द्रः । ३ । २४८ ॥ खण्डनम् । ( दन्तक्षतम् । यथा, आर्य्यासप्तशत्याम् । ५११ ।
"वर्णोच्छ्रितिर्न ललाटे न लुलितमङ्गं न चाधरे दंशः ।
उत्तपञ्चमहारि वारि च न सहसुमायचतुरेण ॥")
दोषः । मर्म्म । सर्पक्षतम् । इति विश्वः ॥ (यथा,
"सर्व्वैरेवार्दितः सर्पैः शाखादष्टस्य देहिनः ।
दंशस्योपरि बध्नीयादरिष्टाश्चतुरङ्गुले ॥
शीतचर्म्मान्त्रवल्कानां मृदुनान्यतमेन च ।
न गच्छति विषं देहमरिष्टाभिर्निवारितम् ॥"
इति सुश्रुते कल्पस्थाने पञ्चमेऽध्याये ॥
असुरविशेषः । यथा, महाभारते ।१२।३।१६।
"सोऽब्रवीदहमासं प्राक् दंशो नाम महासुरः ॥"
अयन्तु भृगुभार्य्यामपहरन् तच्छापात् मांसशोणिताशी कीटो जातः । ततः कदाचित् गुरोः परशुरामस्य निद्रां प्रतिपालयितुः कर्णस्य ऊरुदेशं निर्भिद्य शोणितं पीतवान् । ततः परशुरामेणायं शापात् निर्म्मोचितः ॥ एतद्विवरणन्तु तत्रैवाध्याये द्रष्टव्यम् ॥ )

दंशकः, पुं, ( दशतीति । दन्श+ण्वुल् । ) दंशः । इति हारावली । १२३ ॥ ( नृपविशेषः । स तु कम्पनादेशाधिपतिः । यथा, राजतरङ्गिण्याम् । १७८ ।
"दंशकः कम्पनाधीशः प्रह्वे तत्र सक्रुधि ।
विद्रुतो विषमाटायां निपत्य निहतः खशैः ॥")
दंशनकर्त्तरि, त्रि ॥

दंशनं, क्ली, ( दशतीव शरीरमिति । दंश+ल्युः ।) वर्म्म । (यथा, महाभारते ।३।२६८।१८।
"संनह्यध्वं सर्व्व एवेन्द्रकल्पा
महान्ति चारूणि च दंशनानि ॥"
दन्श+भावे ल्युट् । ) दन्तादिना खण्डनम् । इति हेमचन्द्रः ॥ कामड़ान कुलफुटान इति भाषा । ( यथा, महाभारते । ८ । ८३ । ३४ ।
"दंशनचाहिभिः कृष्णैर्दाहश्च जतुवेश्मनि ॥")

दंशभीरुः, पुं स्त्री, ( दंशात् वनमक्षिकातः भीरुः भयशीलः । ) महिषः । इति त्रिकाण्डशेषः ॥

दंशमूलः, पुं, ( दंशवदुग्रं मूलमस्य । ) शिग्रुः । इति राजनिर्घण्टः ॥ ( गुणादयोऽस्य शिग्रुशब्दे ज्ञातव्याः ॥ )

दंशितः, त्रि, ( दंशो वर्म्म सञ्जातोऽस्य परिहितत्वादिति । दंश+तारकादित्वात् इतच् । ) वर्म्मितः । (यथा, महाभारते । २ । २९ । २ ।
"महता बलचक्रेण परराष्ट्रावमर्द्दिना ।
हस्त्यश्वरथपूर्णेन दंशितेन प्रतापवान् ॥"
दंश्यते इति । दन्श+णिच्+भावे क्तः । ) दष्टः । इति हेमचन्द्रः ॥ ( भासमानः । यथा, महाभारते । ४ । ४० । २ ।
"वारणा यत्र सौवर्णाः पृष्ठे भासन्ति दंशिताः ।
सुपार्श्वं सुग्रहञ्चैव कस्यैतद्धनुरुत्तमम ॥"
"दंशिता भासमानाः ।" इति नीलकण्ठः ॥ )

दंशी, स्त्री, ( ह्रस्वो दंशः । स्वल्पार्थे ङीष् । यद्वा, दशतीति । दंश+अच् । गौरादित्वात् ङीष् ।) क्षुद्रदंशः । इत्यमरः । २ । ५ । २७ । छोटडाँश इति भाषा ॥

दंष्ट्रा, स्त्री, ( दश्यतेऽनयेति । दन्श+"दाम्नीशसेति ।" ३ । २ । १८२ । इति करणे ष्ट्रन् । यद्वा, "सर्व्वधातुभ्यः ष्ट्रन् ।" उणां ४ । १५८ । इति ष्ट्रन् । गौरादिपाठे पितामहीशब्दस्य पाठात् षित्वात् ङीषोऽनित्यत्वात् टाप् । ) दन्त-